# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१)( Old)** | **प्रश्नपत्रम् – 2** | गुणाः –70 |
| विषयः – व्याकरणम् | **कोड –C.C.4.1.1** | समयः- 8 तः 11 पर्यन्तम् |

दिनाङ्कः –10/10/2019 सन्दर्भग्रन्थः – व्याकरणमहाभाष्यम्

---

| **प्र. क्र.** | **प्रथमान्वितिः (Unit 1)** | गुणाः |
|---|---|---|
| **प्रश्न १** | **कस्याप्येकस्य उत्तरं देयम्।** | ५ |
| १ | स्थानेऽन्तरतमः इति सूत्रे स्थाने ग्रहणस्य तमब् ग्रहणस्य च प्रयोजनं यथाभाष्यं लेख्यम्। | |
| २ | ‘अनेकाल्शित्सर्वस्य’ इति सूत्रे शित्करणं किमर्थम्? | |
| **प्रश्न २** | **कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** | १० |
| १ | ‘इग्यणः सम्प्रसारणम्’ इत्यत्र वाक्यस्य संज्ञा आहोस्वित् वर्णस्य इति सविस्तरं स्पष्टयत। | |
| २ | यथाभाष्यं ‘षष्ठी स्थाने योगा’ इति सूत्रं विवेचनीयम्। | |
| | **द्वितीयान्वितिः (Unit 2)** | |
| **प्रश्न ३** | **कस्याप्येकस्य व्याख्यानं विधेयम्।** | ५ |
| १ | आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः। | |
| २ | प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशा न स्थानिवत्। | |
| **प्रश्न ४** | **कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम्।** | १० |
| १ | भाष्यदिशा ‘अचः परस्मिन्पूर्वविधौ’ इति सूत्रे अचः, परस्मिन्, पूर्वविधौ इत्येतेषां पदानां प्रयोजनानि विविच्यताम्। | |
| २ | यथाभाष्यं ‘द्विर्वचनेऽचि’ इति सूत्रं विवेचनीयम्। | |

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्याप्येस्य व्याख्यानं विधेयम्।** ५

१ विभक्तौ तवर्गप्रतिषेधोऽतद्धिते।

२ इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात्।

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम्।** १०

१ भाष्यदिशा 'हलन्त्यम्' इति सूत्रं वर्णयत।

२ सविस्तरं 'भूवादयो धातवः' इति सूत्रं विविच्यताम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्याप्येकस्य व्याख्यानं विधेयम्।** ५

१ विकरणेभ्यः प्रतिषेधः।

२ विपराभ्यामित्युपसर्गग्रहणम्।

**प्रश्न ८ कस्यचिदेकस्य प्रश्नस्य उत्तरं लेख्यम्।** १०

१ यथाभाष्यं 'कर्तरि कर्मव्यतिहारे' इति सूत्रं विवेचनीयम्।

२ भाष्यदिशा 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रं स्पष्टयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ इग्यणः सम्प्रसारणमित्यनेन इग्यणः इति वाक्यस्य सम्प्रसारणसंज्ञा क्रियते आहोस्वित् वर्णस्य?

२ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्?

३ कति षष्ठ्यर्थाः?

४ सप्तमाह्निके भाष्यकारेण कति सूत्राणि व्याख्यातानि?

५ अष्टमाह्निके भाष्यकारेण कानि सूत्राणि व्याख्यातानि सन्ति?

६ 'द्विर्वचनेऽचि' सूत्रे भाष्यकारेण कति पक्षाः प्रदर्शिताः?

७ पूर्वत्रासिद्धे च इति वार्तिकस्य किम्प्रयोजनम्?

८ त्रयादेशे कस्य प्रतिषेधो वक्तव्यः?

९ भूवादयो धातवः इत्यनेन का संज्ञा विधीयते?

१० क्रियावचने कयोः प्रतिषेधो वक्तव्यः?

११ 'तस्य लोपः' इत्यनेन सूत्रेण कस्य लोपो भवति?

१२ कतिविधम् आन्तर्यम्?

१३ 'चुटू' इति सूत्रस्य कोऽर्थः?

१४ 'संक्रीडन्ति शकटानि' इत्यत्र केन वार्तिकेन आत्मनेपदस्य निषेधो भवति?

१५ 'आयच्छते' इत्यत्र केन सूत्रेण आत्मनेपदं भवति?